स्वयं दत्तश्च शौद्रश्च षडदायादबान्धवाः" इति मनूक्तेः तस्य पितृमातृभिन्नदायानधिकारित्वम्। दत्तकमीमांसामते "औरसः क्षेत्रजश्चैव दत्तः कृत्रिम च" पराशरेण कलिधर्म्मप्रस्तावे चतुर्णामेव ग्राह्यताया उक्तेः दत्तकचन्द्रिकामते "दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः" इत्यादि पुराणे दत्तौरसभिन्नानां कलौ वर्ज्यत्वोक्तेश्च क्रीतपुत्रस्य न कलौ कर्त्तव्यता।

क्रीतानुशय पु० क्रीते क्रये अनुशयः। "क्रयविक्रयानुशयश्च" इति मनूक्ते अष्टादशविवादान्तर्गते विवादभेदे अनुशयशब्दे १८६ पृ० तद्विवृतिर्दर्शिता। अधिकं वीरमित्रोदये दर्शितं यथा

"अथ क्रीतानुशयोव्यवहारपदम्। तत्स्वरूपमाह नारदः "क्रीत्वा मूल्येन यत् पण्यं क्रेता न बहु मन्यते। क्रीतानुशय इत्येतद्विवादपदमुच्यते" इति। न बहु मन्यते—सम्यगसम्यगिति पूर्व्वं न विचार्य्य गृहीतमित्यर्थः। क्रीतं परीक्षणीयमित्याह वृहस्पतिः "परीक्षेत स्वयं क्रीतमन्येषाञ्च प्रदर्शयेत्। परीक्षितं बहुमतं गृहीत्वा न पुनस्त्यजेदिति"। अन्येषां पण्यगुणदोषविदामिति शेषः। नारदोऽपि "क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः। परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत् पुनरिति"। चर्मादीनां परीक्षा सद्यः कार्या तथा च व्यासः "चर्म्मकाष्ठेष्टकासूत्रधान्यासवरसस्य च। वसुकुप्यहिरण्यानां सद्य एव परीक्षणमिति"। अत्र वसुशब्देन रूप्यं गृह्यते। कुप्यं रूप्यहेमव्यतिरिक्तं त्रपुसीसादिकम्। तथा च हेमरूप्ये प्रस्तुत्याहामरसिंहः "ताभ्यां यदन्यत्तत्कुप्यमिति"। क्रीतपण्यद्रव्यविशेषेण परीक्षणकालावधिमाह नारदः "त्र्यहाद्दोह्यं परीक्षेत पञ्चाहाद्वाह्यमेव तु। मुक्तावज्रप्रवालानां सप्ताहं स्यात्परीक्षणम्। द्विपदामर्द्धमासन्तु पुंसान्तद्द्विगुणं स्त्रियाः। दशाहं सर्व्ववीजानामेकाहं लोहवाससाम्। अतोऽर्वाक्पण्यदोषस्तु यदि सञ्जायते क्वचित्। विक्रेतुः प्रतिदेयं तत् क्रेता मूल्यमवाप्नुयादिति"। त्र्यहात् क्रयदिनादारभ्येति शेषः। पञ्चाहादित्यादावप्येवमेव शेषोऽवगन्तव्यः। त्र्यहं विक्रेतृप्रतिदेयमित्यादिविधिदर्शनात् त्र्यहाद्दोह्यमित्यादि परीक्षणं प्रीतिदोह्यादिद्रव्यविषयमिति गम्यते इति स्मृतिचन्द्रिका। दोह्यं महिष्यादिकम् वाह्यं बलीवर्दादिकम्। मुक्ताग्रहणं रत्नोपलक्षणम्। द्विपदाम् पुंसान्दासानामित्यर्थः। तद्द्विगुणं मासादित्यर्थः स्त्रियादास्या इत्यर्थः। पूर्व्वोदाहृतचर्म्मकाष्ठेत्यादिव्यासवचनेन भक्षणाद्यर्थं गृहीतानां धान्यादीनां सद्यःपरीक्षणाभिधानात् सर्व्ववीजानामित्यत्र वीजशब्दोऽवाप्यर्थं गृहीतधान्यपरः। अन्यथा सद्यःपरीक्ष्यत्वप्रतिपादकव्यासवचनविरोधः स्यात्। अतोऽर्वाक् त्र्यहादेरभ्यन्तर इत्यर्थः। कात्यायनोऽपि "भूमेर्दशाहोऽनुशयः क्रेतुर्विक्रेतुरेव चेति"। भूमेर्गृहक्षेत्रादिरूपाया अनुशयः परावर्त्तनयोग्यः कालः परीक्षाकाल इति यावत्। यथोक्तपरीक्षाकालातिक्रमे दोषदर्शने न प्रतिदानमित्याह स एव "अविज्ञातन्तु यत् क्रीतं दुष्टं पश्चाद्विभावितम्। क्रीतन्तत् स्वामिने देयम्पण्यं कालेऽन्यथा न त्विति"। अविज्ञातं परीक्षाशैथिल्यात्तत्त्वतोऽपरिज्ञातम्। दुष्टं विभावितं दोषवत्तया ज्ञातमित्यर्थः। काले परीक्षाकाले। अन्यथा तत्कालात्यये दुष्टतया परिभावितमपि तत् स्वामिने न देयम्। अविज्ञातन्तु यत्क्रीतमित्यनेन यत् क्रयात् प्राक् अपरीक्ष्य क्रीतन्तत् परीक्षासमये दोषदर्शने परावर्त्तनीयम्। यत्तु परीक्ष्य गृहीतं तन्न परावर्त्तनीयमिति। दर्शितमर्थं नारदआह "क्रीत्वा नानुशयं कुर्य्याद्वणिक्पण्यविचक्षणः। क्षयं वृद्धिञ्च जानीयात् पण्यानामागमन्तथा। क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः। परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत् पुनरिति"। अनुशयं पश्चात्तापम्। पण्यानां अश्वादीनां अस्मिन्देशे मूल्यहानिरस्मिन्देशे तदाधिक्यमिति क्षयवृद्धी एतद्देशसम्भवमित्यागमञ्च क्रयात् प्रागेव जानीयादित्यर्थः। दोषदर्शनमन्तरेण परीक्षाकाल एव प्रत्यर्पणे विशेषमाह कात्यायनः "क्रीत्वा चानुशयं पश्चात् त्यजेद्दोषादृते नरः। अजुष्टमेव काले तु स मूल्याद्दशमं वहेत्। क्रीत्वा गच्छन्ननुशयं क्रयी हस्तमुपागते। षड्भागन्तस्य मूल्यस्य दत्त्वा क्रीतं त्यजेन्नरः" इति। अजुष्टमनभिभुक्तम्। काले परीक्षाकाले अत्र मूल्यदशमभागदानं यदुपभुज्यमानमपि न नश्यति भूम्यादिकं तद्विषयम् उपभोगविनश्वरवीजादिविषयं षड्भागदानमिति व्यवस्था ज्ञेया। ननु विजानताऽप्यनुशयो न कार्यः "क्रीत्वा नानुशयम् कुर्य्यादिति" निषेधसद्भावादिति चेत्सत्यं अपवादस्य सत्त्वात् स चापवादोदर्शितो नारदेन "क्रीत्वा मूल्येन यत्पण्यं दुष्क्रीतं मन्यते क्रयी। विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाह्न्यविक्षतमिति"। मन्यत इत्यनेन वस्तुतो दोषाभाव उक्तः। द्वितीयादिदिवसे प्रत्यर्पणे विशेषमाह स एव "द्वितीयेऽह्नि ददत् क्रेता मू-